# Ramadashakam

# रामदशकम्

## Document Information

Text title : Rama Dashakam

File name : rAmadashakam.itx

Category : raama, vAdirAja, dashaka

Location : doc_raama

Author : vAdirAjayati

Proofread by : Mrs Sornavalli, Revathy R.

Latest update : May 24, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 24, 2024

*sanskritdocuments.org*

# रामदशकम्

हे राम जलदश्याम स्वामिन्निर्दोष पूरुष ।
भीमतामसयोनीनां मामा मुञ्च तवानुगान् ॥ १॥

उपकृत्यै सज्जनानामपकृत्यै तथाऽसताम् ।
नमतामंहसो हत्यै भूत्यै सर्वदिवौकसाम् ॥ २॥

भीत्यै खरादिदैत्यानां प्रीत्यै च वनवासिनाम् ।
स्वस्यापि महिमोन्नत्यै नीत्यै चारण्यचारिणौ ॥ ३॥

ब्रह्मरुद्रादिभिर्देवैरर्चितौ श्रुतिचर्चितौ ।
ज्ञानानन्दमयौ ध्यातृप्रियौ सर्वगुणाश्रयौ ॥ ४॥

ध्वजवज्राङ्कुशाम्भोजराजितौ राजपूजितौ ।
रक्तपद्मोपमौ ध्वस्तश्रमौ विद्रावितभ्रमौ ॥ ५॥

नारीकृतशिलौ रम्यतळौ दिव्याङ्गुलीदलौ ।
वृत्तमौक्तिकसङ्काशनखौ त्रिजगतीसुखौ ॥ ६॥

विचित्रभूषणोपेतौ भीषणौ त्यक्तदूषणौ ।
लक्ष्मीधराकराम्भोजसेवितौ सिद्धभावितौ ॥ ७॥

अनन्तवैदिकपदास्पदौ स्वजनसम्पदौ ।
अजाण्डभञ्जनौ धूताञ्जनौ भुवनरञ्जनौ ॥ ८॥

क्ष्माभारहारिणौ मुक्तिकारिणौ भववैरिणौ ।
पार्थदत्तधनौ युक्तयाऽपार्थिङ्कृतसुयोधनौ ॥ ९॥

तेवनौत्सुक्यतो भूमिपावनौ प्रणतावनौ ।
सीताभिरामौ श्रीरामचरणौ शरणं मम ॥ १०॥

इमानि दश पद्यानि श्रमापहृतये सताम् ।
यतिना वादिराजेन कृतिना रचितानि वै ॥ ११॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं
श्रीरामदशकं सम्पूर्णम् ।

भारतीरमणमुख्यप्राणान्तर्गत श्रीकृष्णार्पणमस्तु ।

Proofread by Mrs Sornavalli

---

*Ramadashakam*

pdf was typeset on May 24, 2024

Please send corrections to *sanskrit@cheerful.com*